*Poona Oriental Series No. 99.*

परमहंसशिवानंदतीर्थस्वामिभिः संकलितः

# उग्ररथशान्तिप्रयोगः

( नैमित्तिककर्मस्वरूपेयं शान्तिः अपमृत्युनिवारणाय
षष्टितमेऽब्देऽनुष्ठेयत्वेन स्मृतिग्रन्थेषु प्रोक्ता वर्तते )

# UGRARATHA-ŚĀNTIPRAYOGA

*BEING THE 60th YEAR CELEBRATIONS RITUAL*

Compiled by

**Paramahamsa Shivānanda Tīrtha**

WITH

Introductions in English & Sanskrit

DONATED BY :
TARIKERE RAMARAO, LAWYER
SITARAMAIAH &
ANANTHA SUBBA RAO
CHIKMAGALUR.

वाराणसी

ORIENTAL BOOK AGENCY
15, SHUKRAWAR, POONA-2 (INDIA)

1958] [Rs. 5.-

# अनुक्रमणिका


| | Page |
|---|---|
| Preface | 1 |
| प्रास्ताविकम् ... ... | 7 |
| उग्ररथशान्तिप्रयोगः ... ... | 9 |
| प्रायश्चित्तविधिः ... ... | 9 |
| शान्तिविधिः ... ... | 13 |
| प्रथमेऽहनि ... ... | 13 |
| द्वितीयेऽहनि ... ... | 27 |
| तृतीयेऽहनि ... ... | 28 |
| चतुर्थेऽहनि ... ... | 30 |
| पूर्णाहुतिर्वसोर्धारा च ... ... | 31 |
| अभिषेकः ... ... | 37 |
| देवताविसर्जनम् ... ... | 45 |
| आचार्यपूजनम् ... ... | 46 |
| परिशिष्टम् १ ... ... | 47 |
| अग्निजननम् ... ... | 47 |
| परिशिष्टम् २ ... ... | 54 |
| ग्रन्थान्तरेभ्य उद्धृता उग्ररथशान्तिप्रयोगाः ... | ,, |
| बौधायनीया उग्ररथशान्तिः ... | ,, |
| वैखानसगृह्यसूत्रोक्ता शान्तिः ... | ,, |
| ऋग्वेदब्रह्मकर्मसमुच्चयगता षष्टितमाब्दे उग्ररथशान्तिः ... | 55 |
| शान्तिकमलाकरे उग्ररथशान्तिः ... | 57 |
| शैवायनोक्ता उग्ररथशान्तिः ... | 61 |

# PREFACE

The *Ugrarathaśānti* which is being presented here belongs to the category of the *naimittika* rites which a faithful follower of the Hindu religion is required to perform on the proper occasion. Certain years, namely, the 1st, the 8th, the 21st, the 32nd and the 60th in the life of a man have been considered to be critical. During the first year prayers are offered to the presiding deity on the birth-day coming every month; and at the end of the first year the birth-anniversary day (*vardhāpana*) is observed. Th s ceremony is repeated every year, and in the case of the 60th year it is celebrated on an elaborate scale with a view to warding off untimely demise (*upamṛtyu*). At the advanced age of sixty, the limbs get disabled and basic elements in the body (*saptadhātus*) deteriorate, ultimately giving cause for various ailments. God is, therefore, invoked in different aspects to strengthen the body and invigorate the mind. Well has said Kālidāsa in the *Kumārasambhava* : Health is the initial means of practising religion ( शरीरमाद्यं खलु धर्मसाधनम् ).

*Ugraratha* is the name given to the 60th year and it indicates a critical stage of human life. It is also a turning point in a man's life. On the right side of sixty one naturally has greater attachment towards worldly things; on the wrong side he is expected to detach himself from the material world and have leanings towards spiritual life.

In order to achieve both these objects, namely, maintaining sound health and strengthening the mind for spiritual attainments, a specific rite, (*Śānti*), is performed in the 60th year. This *Śānti* is known by three different names: *Ugraratha*, *Mārkaṇḍeya* and *Ṣaṣṭitamābda*. The first name indicates the character of the 60th year; the second indicates the principal divinity in the *Śānti*, and the third, the time at which it is to be performed. The whole 60th year is *Ugraratha*, hence the proper time for performing the *Śānti* is when the 60th year begins, not when it ends. Failing this day, it may be performed during the year on the day coinciding with that constellation on which one was born. Some call this

rite as *Ṣaṣṭyabdapūrti*, that is, a *Śānti* pertaining to the completion of the 60th year.

The following are some of the authorities prescribing the celebration of this *Śānti* :

अतीतपूर्वार्धवयाः कुर्यादुत्तर आयुषि ।<br>
श्रेयःसंपादनार्थाय शान्तिमुग्ररथाभिधाम् ।। देवलः

अशेषविघ्नशान्त्यर्थं सर्वदोषप्रशान्तये ।<br>
षष्ट्यब्दसंधौ कर्तव्या शान्तिरुग्ररथाभिधा ।। कौशिकः

प्रेयस्तु पूर्ववयसि श्रेय उत्तर आयुषि ।<br>
साधनीयं प्रयत्नेन ब्राह्मणेन विपश्चिता ।।

श्रेयसि विघ्नबहुलं प्रसिद्धं तन्निवृत्तये ।<br>
आदौ शान्तिं प्रकुर्वीत श्रेयस्कामो द्विजोत्तमः ।। वामनः

अपमृत्युकण्टकादिसर्वारिष्टप्रशान्तये ।<br>
षष्टिसंवत्सरे कार्या शान्तिरुग्ररथाभिधा ।<br>
तीर्त्वा सर्वारिष्टदोषं पूर्णायुर्ब्राह्मणो भवेत् ।। नारदः

षष्ट्यब्दसंधिसमयो महद्दोषकरः स्मृतः ।<br>
अतस्तद्दोषशान्त्यर्थं कुर्यादुग्ररथं द्विजः ।। अङ्गिराः

**The Literature on the Ugrarathaśānti**

The oldest reference to the *Ugrarathaśānti* is found in the *Baudhāyana Gṛhyaśeṣasūtra*[1]. The procedure of this *Śānti* as given in the eighth Adhyāya of that Sūtra-text is as follows :—

" A person belonging to one of the three castes, namely, Brāhmaṇa, Kṣatriya and Vaiśya, should perform this *Śānti* in the 60th year since his birth-day in the month in which he was born. He should get prepared a place ( *sthaṇḍila* ) of the size of a cow's hide and cleansed with cow-dung. Towards the south-east of this fire-place he should place an image of *Mṛtyu* prepared out of two *niṣkas* of gold. He should duly place a water-pot ( *kalaśa* ) upon grains spread towards the south-east and place the golden image upon that water-pot. He should murmur 108 times the verses, *apaitu mṛtyuḥ..* , *param mṛtyo.....* , *mā nas toke ..* , and *tryambakaṁ yajāmahe....* Then he should perform the rites beginning with the drawing up of three lines on

1. Mysore, 1920, pp. 374–5.

the place selected for the fire-place and ending with the oblations called *agnimukha* (see *Baudh GS 1.3*). He should offer on the fire cooked rice taken two times. He should recite as puronuvākyā the verse *mā no mahāntam....* and offer the oblation with the verse, *mā nas toke.....* He should further offer oblations of clarified butter with each of the verses of the *ghṛtasūkta* (*ṚV* 4.58). Then he should perform the rites beginning with the *sviṣṭakṛt* offering and ending with the giving away of a cow as *dakṣiṇā*. To the front of the fire, he should place the remnants of the oblation on the *dūrvā*-stems. To the rear of the fire he should sit down facing towards the east and while reciting the verses from the *Mṛtyusūkta*, *Āyuṣyasūkta* and also from the Purāṇas sprinkle himself with water from the water-pot. He should worship his preceptor, give away suitable *dakṣiṇā* to the priests and feed the Brāhmaṇas."

The later works like the *Ṛgvedabrahmakarmasamuccaya* (Nirṇay Sagar Press, Bombay) and the *Śāntikamalākara* (Jagaddhitecchu Press, Poona, 1890.) present this *Śānti* in a developed form. According to the Baudhāyana school, the *yajamāna* himself performs the entire rite; according to the later works he is required to take the help of the priests. At the pronouncement by the *yajamāna* of his desire (*saṁkalpa*) to be made at the beginning of the *Sānti*, reference is made to the following portents: Accidental death, evil dream, loss of parents, loss of wife and son, evil effects of constellations, royal displeasure, deformation of face due to various diseases, invisibility of heavenly bodies like *Dhruva*, the sight of the *yakṣa*, *rakṣas*, *bhūta*, *preta*, *piśāca* etc. The divinity of Mṛtyu in *BaudhGS* has been replaced here by *Mārkaṇḍeya*. There are other divinities also like the Mṛtyuṁjaya and the seven *cirajīvins*, namely, Aśvatthāman, Bali, Vyāsa, Hanūmān, Bibhīṣaṇa, Kṛpa and Paraśurāma. The golden image is of Mārkaṇḍeya instead of Mṛtyu. The later element of worship (*pūjā*) has also been incorporated herein. The oblations consisting of various materials are offered to the divinities, and these are followed by the murmuring of verses and hymns mostly belonging to the *Ṛgveda*. Then the priests are asked to sprinkle water from the *kalaśa* on the persons of the *yajamāna* and his household. The *yajamāna* then offers prayers to Mārkaṇḍeya and the seven *cirajīvins*. The rite given in the *Ṛgvedabrahmakarma-*

*samuccaya* and the *Śāntikamalākara* is attributed to Śaunaka to whom the texts ancillary to the *Ṛgveda* are usually attributed.

The *Ṣaṣṭyabdapūrtiśānti* has also been described in a collection of *Śāntis*, called *Śāntikusumākara.*[2] It bears No. 41 and is composed of verses in the Anuṣṭubh metre. Śaunaka has been mentioned as the author of this *Śānti.* In addition to the above-mentioned divinities, Brahmā, Mahāviṣṇu, Rudra, the Dikpālas, the nine planets, the 27 constellations, the sixty Saṁvatsaras, the seven Ṛṣis and the life (*āyuḥ*) have also been mentioned as the divinities. Each of these divinities is to be represented by a golden image placed on a *kalaśa.* The total number of images and *kalaśas* reaches 136, and if the *yajamāna* is not in a position to procure that much number, he is asked to procure 33 or 12 or 9. The *yajamāna* himself is required to take a bath after the worshipping of the divinities. The Mantras employed are mostly from the *Taittirīya Saṁhitā.* After the Anuṣṭubh verses the entire *prayoga* is given in prose.

The *Ugrarathaśānti* has been described also in a work called *Śaivāgama.* In response to a request made by Guha, Śaṁkara is said to have prescribed this *Śānti* for warding off the numerous evils resulting from the appearance of Ugraratha. The description is in Anuṣṭubh verses. The divinities to be worshipped according to this *Śānti* are as follows :—The seven *cirajīvins*, the sixty *Saṁvatsaras*, the two *Ayanas*, the six *Ṛtus*, the twelve months, the two fortnights, the names of the *tithis*, the names of the days (*vāra*), the constellations, the *Yogas*, the *Karaṇas*, the twelve *Rāśis*, the five *Brahmans*, the seven *Vāyus*, the eight *Vasus*, the nine Durgās, the ten *Diśas*, the eleven Rudras, the twelve Ādityas, Brahmā, Viṣṇu, and the two Rudras called Vighneśa and Kṣetrapālaka.

**The Ritual of the Ugrarathaśānti**

The chief presiding divinity in the *prayoga* given herein is Mārkaṇḍeya. Knowing that he had to meet his death at the age of the sixteenth year Mārkaṇḍeya practised penance for invoking the favour of God Śiva. Śiva was pleased with his devotion and

2. Edited by M. A. V. Anantaram Śastri, Kumbakonam, 1935, Saradavilasa Press; Grantha script.

made him "everliving" (*cirajīvin*). He further bestowed on him the boon that whosoever worships Mārkaṇḍeya will become "ever-living" like him. This is why Mārkaṇḍeya forms the chief divinity in this *Śānti*.

The seven *cirajīvins*, namely, Aśvatthāman, Bali, Vyāsa, Hanūmān, Bibhīṣaṇa, Kṛpa and Paraśurāma, are further worshipped. The purpose in worshipping these eternal beings is quite evident. Other divinities which are further worshipped include the nine planets, Mṛtyuṁjaya, sixteen divinities named *kumuda*, *kumudākṣa* etc., and the presiding divinities of the various divisions of time, namely, the year, *ayana*, season, month, day, constellation, days of week etc. The purpose in worshipping the nine planets and Mṛtyuṁjaya is to ward off, as far as possible, the planetary evil aspects and untimely death. As regards the presiding divinities of the various divisions of time, it is said in the *Kālamādhava:* ईश्वरो नित्यकालात्मा चिन्तनीयः सुकर्मसु. Time without limits (*nirupādhika kāla*) has been compared to *nirguṇa paramātman*. Divisions of time are, indeed, limitations of time and hence may be compared to *saguṇa Brahman*. Human life is also time with limits. Hence these divisions of time have been considered as the forms of *saguṇa Brahman* and their worship has been prescribed in this *Śānti*.

A summary of the performance of the *Ugrarathaśānti* as described in the following pages may be given here : One desirous of performing the *Ugrarathaśānti* should perform the relevant expiation-rites three days before the day on which the sixtieth year of his age commences. Next morning, he should formally pronounce his desire to perform the *Ugrarathaśānti* and choose the officiating priests. In the evening he should ceremonially place, at a place especially prepared for the purpose, *kalaśas* i. e. pots full of water in adequate number representing the various divinities. He should then invoke these divinities, worship them and offer prayers to them. Next morning he should offer, through his officiating priest, oblations of sesamum-seed besmeared with clarified butter, *dūrvā*-grass and other materials on the sacred fire specially produced or procured for the purpose. Next morning, that is, on the very day on which his sixtieth year commences, he should offer oblations of cooked rice to the

divinities, pay obeisance to them, invoke their favour and pray for long and healthy life, vigour and prosperity. Next day he should perform the *śāntikarma*, offer the *vasor dhārā* and the *pūrṇāhuti*. Thereupon the officiating priests should sprinkle the *yajamāna* and his family-members with the water collected out of the *kalaśas*. At the end the *yajamāna* should distribute suitable *dakṣiṇās* to the officiating priests. Thus ends the performance of the *Ugrarathaśānti*.

The ritual of the *Ugrarathaśānti* as described herein goes on for four days. The extent of this period might be reduced in accordance with one's desire. Thus one may reduce this rite to three days by omitting the ritual of *vasor dhārā*. Those who wish further reduction in the number of days may omit even *agnijanana* and finish the rite in two days; others may do it even in one day following the *prayoga* given in the *Ṛgvedabrahmakarmasamuccaya* and similar works. In the case of any modification, the day of commencement will, of course, have to be suitably changed. The *prayogas* of this *Śānti* as given in the above-mentioned sources have been printed in extenso in the Appendix.

The need for editing this *prayoga* was felt by the compiler when he had to perform this *Śānti* for himself in his *gṛhasthāśrama*. A book containing all the necessary injunctions together with the relevant mantras in full could not be had, hence he had to exert himself for editing a suitable text. The *Śānti* proper is based on the text contained in a manuscript deposited in the library of Sri Chitrapur Math at Shirali, North Kanara. It forms part of the *Śaunakīya prayoga*. The Appendix *agnijanana* is from *Āgama* and has been copied from a manuscript possessed by the late Sri Mangesh Bhatt Kailaje of Karkal, South Kanara. The mantras have been referred to their original sources as far as possible. They have been printed in black type for distinction, and have been provided with accents wherever possible. This book will be partly useful also in performing any *Śānti*-rite other than the *Ugrarathaśānti*, because the auxiliary rites and mantras such as the *Kalaśapratiṣṭhā*, the *Pūrṇāhuti*, the *Vasor dhārā*, the verses to be recited in connection with the *Kalaśābhiṣeka* and the like which are common to most of the *Śāntikakarmans* have been given here.

**Acknowledgment**

I now discharge the pleasant duty of tendering my heart-felt thanks to Sri. C. G. Kashikar, Jt. Secretary, Vaidika Saṃśodhana Maṇḍala, Poona, for going through the entire press-copy and for seeing the work through the press. I also thank the several Vedic scholars of Gokarn for their assistance in the editing of this work. I must also thank Dr. R. N. Sardesai, Proprietor of the well-known Oriental Book Agency of Poona, for having undertaken the publication of this my humble effort.

Shirali ( Kanara )
*Vaiśākha 10, Śaka 1880*
April 22, 1958

Śivananda Tirtha

---

Shrinath.uduapa@gmail.com

श्रीः

# प्रास्ताविकम्

अथायम् उग्ररथशान्तिप्रयोगः वैदिकधर्मश्रद्धावतां करकमलेषु सादरं समर्प्यते । नैमित्तिककर्मस्वरूपेयं शान्तिः अपमृत्युनिवारणाय षष्टितमेऽब्देऽनुष्ठेयत्वेन स्मृतिग्रन्थेषु प्रोक्ता वर्तते । उग्ररथशान्तिः, मार्कण्डेयशान्तिः, षष्टितमाब्दशान्तिः इत्यादिभिर्विविधाभिः संज्ञाभिरियं बोध्यते ।

उग्ररथशान्तिप्रयोगा बहव उपलभ्यन्ते । बोधायनीयगृह्यशेषसूत्रे इयं शान्तिरुपवर्णिता । तत्पाठोऽस्य ग्रन्थस्य परिशिष्टे द्रष्टव्यः । जन्मदिनादारभ्य षष्टितमसंवत्सरे जन्ममासे जन्मनक्षत्रे चतुरश्रं स्थण्डिलं कृत्वा निष्कद्वयेन मृत्युप्रतिमां कृत्वा धान्यानामुपरि कलशं स्थापयित्वा तदुपरि स्वयं यजमानः प्रतिमां पूजयेत्, मन्त्रान् जपित्वा चरोराहुतिमाज्याहुतीश्चाग्नौ जुहुयात्, मृत्युसूक्तायुष्यसूक्तादिभिश्च कलशोदकेनात्मानमभिषिञ्चेत्, आचार्यं संपूज्य ऋत्विग्भ्यो दक्षिणां दत्त्वा ब्राह्मणान् भोजयेदिति संक्षेपतस्तत्रस्थो विधिः । ऋग्वेदीयब्रह्मकर्मसमुच्चये शान्तिकमलाकरे चायं प्रयोगो विस्तरेणोपदिष्ट उपलभ्यते । बोधायनसूत्रापेक्षया तत्र केचन विशेषा

दृश्यन्ते । तथा च विधेः विस्तृतत्वादृत्विजां साहाय्यमवश्यं ग्राह्यं भवति । अत्र मार्कण्डेयः प्रधानदेवता मृत्युञ्जयः सप्त चिरजीविनश्च देवतात्वेनावाहनीयाः । अत्र विनियुक्ता मन्त्राः प्रायः ऋग्वेदीया दृश्यन्ते । शान्तिकुसुमाकराख्ये ग्रन्थेऽप्यस्याः शान्तेः प्रयोगो वर्णितो दृश्यते । तत्र च पूर्वोक्तदेवताभिः सह ब्रह्मा, महाविष्णुः, रुद्रः, दिक्पालाः, नवग्रहाः, नक्षत्राणि, संवत्सराः, सप्तर्षयः, आयुः इत्येता देवता आवाहनीयत्वेनोक्ताः । तासां प्रतिकलशमेकैका सुवर्णमयी प्रतिमा स्थापनीया भवति । अत्र विनियुक्ता मन्त्राः प्रायः कृष्णयजुर्वेदतैत्तिरीयशाखागता दृश्यन्ते । अनुष्टुप्-छन्दोबद्धैः श्लोकैरादौ शान्तिर्विरचिता, अनन्तरं च गद्यरूपः प्रयोगोऽपि दत्तोऽस्ति । एते सर्वे प्रयोगाः शौनकीयप्रयोग इति संज्ञां बिभ्रति ।

शैवागमे शिवगुहसंवादरूपेणेयं शान्तिः आनुष्टुभैः श्लोकैर्वर्णिता दृश्यते । तत्र चैता देवताः – सप्त चिरजीविनः, षष्टिसंवत्सराः, द्वे अयने, षड्ऋतवः, द्वादश मासाः, द्वौ पक्षौ, तिथिनामानि, वारनामानि, नक्षत्राणि, योगाः, करणानि, द्वादश राशयः, पञ्च ब्रह्माणः, सप्त वायवः, अष्टौ वसवः, नव दुर्गाः, दश दिशः, एकादश रुद्राः, द्वादशादित्याः, ब्रह्मा, विष्णुः, विघ्नेशक्षेत्रपालकौ च रुद्रौ ।

अत्र मुद्रिते प्रयोगे मार्कण्डेयः प्रधानदेवता । देवतान्तराणि चेत्थम् :– सप्तचिरजीविनः, नवग्रहाः, मृत्युंजयः, कुमुदकुमुदाक्षादिषोडशदेवताः, अयनर्तुमास-दिननक्षत्रवारादीनां चाधिष्ठात्र्यो देवताः । अत्रोपवर्णितमनुष्ठानं चतुर्दिनसाध्यम् । वसोर्धारां वर्जयित्वा दिनत्रयेण तत्कर्तुं शक्यम् । अग्निजननप्रयोगं वर्जयित्वा तु दिनद्वयेनापि तत् समाप्येत । ऋग्वेदीयब्रह्मकर्मसमुच्चयादिग्रन्थोक्तः प्रयोगस्त्वेक-दिनसाध्यः । उपरिनिर्दिष्टाः सर्वे प्रयोगा अत्र परिशिष्टरूपेण मुद्रिताः सन्ति ।

शौनकोक्तोऽयमुग्ररथशान्तिप्रयोगः सुसंपाद्य संदर्भसंख्यादिभिः संयोज्य चात्र मुद्रितोऽस्ति । प्रयोगोऽयमन्येष्वपि शान्तिकर्मस्वंशत उपयोक्तुं शक्यः ।

ग्रन्थस्यास्य संपादने श्रीमद्भिः चिं. ग. काशीकरमहोदयैः पुणें-नगरे वैदिक-संशोधनमण्डलस्य कार्यवाहैः सुमहत् साहाय्यं कृतम् । गोकर्णक्षेत्रस्थैः बहुभिः पण्डितवरैरप्यस्य ग्रन्थस्य संकलने उपकृतम् । एते सर्वे धन्यवादार्हाः । ओरिएण्टल-बुक-एजन्सीसंचालकैः श्रीमद्भिः डॉ. रा. न. सरदेसाईमहोदयैः स्वीयायां ग्रन्थमालायां ग्रन्थोऽयं प्रकाशित इति तैरतीवोपकृतोऽयं जनः ।

शिराली - कन्नड
सौर वैशाख १०, शके १८८० } **स्वामी शिवानन्दतीर्थ**

# ॥ अथ उग्ररथशान्तिप्रयोगः ॥

ॐ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तन्नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥१॥
भवानीशङ्करं नत्वा पितरौ च गुरूंस्तथा ।
भक्त्याश्वलायनादींश्च सच्छिष्टानां प्रमाणतः ॥ २ ॥
हिताय सर्वलोकानां शिष्टानां परितुष्टये ।
लिखाम्युग्ररथस्यात्र विधिं षष्ट्यब्दपूर्तिकम् ॥ ३ ॥
तत्रादौ संप्रवक्ष्यामि मन्वादीनां प्रमाणतः ।
प्रायश्चित्तविधिं सम्यक् कृतकल्मषशान्तये ॥ ४ ॥

## प्रायश्चित्तविधिः

कर्ता कृतनित्यक्रिय आवश्यकसम्भारान् गृहीत्वा गङ्गादिमहातीर्थसन्निधौ गत्वा आचम्य पवित्रपाणिः प्राणानायम्य देशकालौ सङ्कीर्त्य हेमाद्रिप्रोक्तं महासङ्कल्पं कृत्वा "मम करिष्यमाणोग्ररथशान्त्यधिकारसिद्ध्यर्थं प्रायश्चित्तं करिष्ये । तदङ्गत्वेनादौ ब्रह्मदण्डपूर्वकं वपनादि करिष्ये । तत्रादौ सार्धाब्दं कृच्छ्रं करिष्ये" इति संकल्प्य तानि कृत्वा । **यानि कानि च पापानि ब्रह्महत्यासमानि च । केशानाश्रित्य तिष्ठन्ति तस्मात्केशान् वपाम्यहम् ॥ आयुर्बलं यशो वर्चः प्रजापशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ मुखदुर्गन्धिनाशाय दन्तानां च विशुद्धये । ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥** इत्यादिना वपनपूर्वकं प्रायश्चित्ताङ्गदन्तधावनादि कृत्वा द्वादश गण्डूषान् विधाय सकृत् स्नात्वा दशविधस्नानानि कुर्यात् । तत्रादौ भस्मस्नानं करिष्ये । भस्मादाय । **ईशानः सर्वविद्यानाम्०**[1] इति शिरसि । **तत्पुरुषाय०**[2] इति मुखे । **अघोरेभ्यो०**[3] इति हृदये । **वामदेवाय०**[4] इति गुह्ये । **सद्योजातं०**[5] इति पादयोः । प्रणवेन सर्वाङ्गे विलिप्य स्नात्वा । गोमयस्नानं करिष्ये । **गन्धद्वारां०**[6] ।

---

१. तैआ. १०.४७; २. तैआ. १०.४६; ३. तैआ. १०.४५
४. तैआ. १०.४४. ५. तैआ. १०.४३. ६. तैआ. १०.१.

अग्रमग्रं चरन्तीनामोषधीनां वने वने । तासामृषभपत्नीनां पवित्रं कायशोधनम् । तन्म रोगांश्च शोकांश्च नुद गोमय सर्वदा ॥ इति मूर्धादिसर्वाङ्गमुपलिप्य स्नात्वा आचम्य । मृत्तिकास्नानं करिष्ये । अश्वक्रान्ते०[1] ॥ उद्धृतासि वराहेण०[1] इति मृदं गृहीत्वा । नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत । दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत[2] ॥ स्योना पृथिवि०[3] ॥ इति सर्वाङ्गमुपलिप्य स्नात्वा द्विराचम्य । हिरण्यशृङ्गं०[1] ॥ याः प्रवतो निवतः०[4] ॥ आपो अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्र वहन्ति देवीरुदिदाभ्यः शुचिरा पूत एमि[5] ॥ इदं विष्णुर्वि चक्रमे०[6] ॥ इति प्रवाहाभिमुखो निमज्जेत् । पञ्चगव्यस्नानं करिष्ये । ध्रुवासु त्वासु क्षितिषु०[7] इति गोमूत्रम् । गन्धद्वाराम्०[1] इति गोमयम् । आप्यायस्व०[8] इति पयः । दधिक्राव्णो०[9] इति दधि । घृतं मिमिक्षे०[10] इति घृतम् । देवस्य त्वा०[11] इति कुशोदकम् । इमं मे गङ्गे०[12] ॥ सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः[1] ॥ समुद्रज्येष्ठाः०[13] ॥ या आपो दिव्या उत वा स्रवन्ति०[13] ॥ यासां राजा०[13] ॥ यासु राजा०[13] ॥ एतो न्विन्द्रं स्तवाम...सिषाससि[14] ॥ तरत्स मन्दी धावति०[15] ॥ यदन्ति यच्च दूरके०[16] ॥ इति जपित्वा आपो हि ष्ठा०[17] ॥ इति स्नात्वा ऋतं च०[1] इत्यघमर्षणम् ॥ द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाऽऽज्यम् । आपः शुन्धन्तु मैनसः[18] ॥

---

१. तैआ. १०.१. २. ऋसं. १०.३७.१. ३. ऋसं. १.२२.१५. ४. ऋसं. ७.५०.४. ५. ऋसं. १०.१७.१० ६. ऋसं. १.२२.१७. ७. ऋसं. ७.८८.७. ८. ऋसं. १.९१.१६ ९. ऋसं. ४.३९.६. १०. ऋसं. २.३.११. ११. तैसं. १.७.१०.३ १२. ऋसं. १०.७५.५. १३. ऋसं. ७.४९.१–४. १४. ऋसं. ८.९५.७–९. १५. ऋसं. ९.५८.१. १६. ऋसं. ९.६७.२१. १७. ऋसं. १०.९.१–३ १८. तैब्रा. २.६.६.३.

प्रतिदेवतं सप्तविंशतिरित्येवमष्टोत्तरशताहुतीः प्रतिदेवतं सप्त इत्येवमष्टाविंशतिसङ्ख्याहुतीर्वा हुत्वा पञ्चगव्येन साग्रैः सप्तपत्रैर्हरितैः कुशैर्दशाहुतीर्जुहुयात् । तत्र मन्त्राः । **ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या । व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः[1] स्वाहा** ॥ पृथिव्या इदं न मम ॥ **ॐ इदं विष्णुर्वि चक्रमे०[2] स्वाहा** ॥ विष्णव इदं न मम ॥ **ॐ मा नस्तोके तनये०[3] स्वाहा** ॥ रुद्रायेदं न मम ॥ **ॐ ब्रह्म जज्ञानं प्रथमं०[4] स्वाहा** ॥ ब्रह्मण इदं न मम ॥ **ॐ अग्नये स्वाहा** ॥ अग्नय इदं न मम ॥ **ॐ सोमाय स्वाहा** ॥ सोमायेदं न मम ॥ **ॐ तत्सवितुर्वरेण्यं०[5] स्वाहा** ॥ सूर्यायेदं न मम ॥ **ॐ प्रजापते न त्वदेता०[6] स्वाहा** ॥ प्रजापतय इदं न मम ॥ **ॐ प्रजापतये स्वाहा** ॥ प्रजापतय इदं न मम ॥ **ॐ अग्नये स्विष्टकृते स्वाहा** ॥ अग्नये स्विष्टकृत इदं न मम ॥ इति दश पञ्चगव्याहुतीर्हुत्वा केवलाज्यस्य **यदस्य०[7]** इति स्विष्टकृतं हुत्वा होमं समापयेत् । होमशेषं पञ्चगव्यं निःशेषं पीत्वाऽधस्तनमन्त्रान् जपेत् :—

**ॐ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु । शं नो भवतु भुवनस्य यस्पतिः[8] ॥ ऊर्ध्वो नः पाह्यंहसो निकेतुना विश्वं समत्रिणं दह । कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः[9] ॥ त्वं हि विश्वतोमुख विश्वतः परिभूरसि । अप नः शोशुचदघम्[10] ॥ देवकृतस्यैनसोऽवयजनमसि स्वाहा ॥ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा ॥ पितृकृतस्यैनसोऽवयजनमसि स्वाहा ॥ एनस एनसोऽवयजन-**

---

१. ऋसं. ७.९९.३. २. ऋसं. १.२२.१७. ३. ऋसं. १.११४.८. ४. तैआ. १०.१. ५. ऋसं. ३.६२.१०. ६. ऋसं. १०.१२१.१०. ७. आश्व. गृ. सू. १.१०.२३. ८ वासं. ३६.२. ९. ऋसं. १.३६. ४. १०. ऋसं. १.९७.६

मंसि स्वाहा[1] ॥ नानानं वा उ नो धियो वि व्रतानि जनानाम् । तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥ जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् । कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥ कारुरहं ततो भिषगुपलप्रक्षिणी नना । नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव ॥ अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः । शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव[2] ॥ इत्यन्तं सोमसूक्तं जपित्वा प्रायश्चित्ताङ्गतया अयुतं सहस्रं वा गायत्रीं जप्त्वोपवसेत् । इति प्रायश्चित्तविधिः ॥

# शान्तिविधिः

## प्रथमेऽहनि

कर्ता पूर्वेऽहनि कृतपूर्वोक्तप्रायश्चित्तः षष्टितमवर्षारम्भादिनद्वयपूर्वे स्नात्वा कृतनित्यक्रियो विप्रानामन्त्र्य तेभ्योऽनुज्ञां प्राप्य गुरुदेवतादीन् नमस्कृत्य द्विराचम्य पवित्रपाणिः प्राणानायम्य देशकालावनुकीर्त्य "मम जन्मनः सकाशात् षष्टितमाब्द-प्राप्त्या भविष्यत्त्वेन इह जन्मनि जन्मान्तरेष्वपि कृतानेकशुभाशुभकर्मविपाक-सूचितानाम् अपमृत्युघोरमृत्युदुःस्वप्नदर्शनभार्यापुत्रवियोगराजबाधाज्वरादिघोर-रोगबाधामतिवैकल्येंद्रियवैकल्यदृष्टिदन्ताद्यवयवशैथिल्याद्यनेकाध्यात्मिकबाधानिरासेन ग्रहपीडाग्निबाधाध्रुवादिनक्षत्रज्योतिषां चादर्शनयक्षराक्षसभूतप्रेतपिशाचशाकिनी-डाकिन्यादिविविधदर्शनाद्याधिदैविकबाधासूचितमहोत्पातानां निरासेन सर्पवृश्चिकादि-दुष्टकीटकदंशव्याघ्रसिंहशृगालव्यालबाधादिसूचिताधिभौतिकपीडादिसकलारिष्टशमनार्थं तथोत्तरायुषि कर्तव्यत्वेन निर्धारितामुष्मिकसाधनेषु श्रीमार्कण्डेयप्रभृतिचिरजीविनां प्रसादसिद्धिद्वारा निःश्रेयसप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं चोग्ररथशान्त्याख्यं कर्म करिष्ये । तदङ्गतया स्वस्तिपुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं च करिष्ये । आदौ निर्विघ्नतासिद्ध्यर्थं श्रीमन्महागणपतिपूजनं च करिष्ये" इति सङ्कल्प्य तानि कुर्यात् । (स्वस्तिवाचने उग्ररथशान्तिकर्मणः पुण्याहं भवन्तो ब्रुवन्तु इत्यूहः कार्यः ।) मातृकापीठं विहायाऽन्यानि विसृज्य मातृकापीठं मण्डपस्यैशान्यां संस्थापयेत् । तत

---

१. तैआ. (परिशिष्ट) १०.५९. २. ऋसं. ९.११२.१-४.

आचार्यब्रह्मसदस्यादीनृत्विजो वृत्वा मधुपर्केण पूजयेत् । अन्यानपि शौचाचारयुतान् ब्राह्मणान् ऋग्वेदादिपठनजपाद्यनुष्ठानार्थं वृत्वा यथाविभवं गन्धादिना पूजयेत् । विश्वामित्रः—सम्पूज्य मधुकर्पेण ऋत्विजः कर्म कारयेत् । अपूज्य कारयेत् कर्म किल्बिषेण च युज्यते ।। चिकीर्षितस्य कर्मणः निर्विघ्नतासिद्धये गणहवनचिकीर्षायां गणहोमं यथाविधि कुर्यात् ।

अथ सायं सूर्यास्तात्पूर्वं संध्यादिकं निर्वर्त्य, उदकुम्भादिपूजाद्रव्याणि गृहीत्वा, मण्डपं प्रविश्य स्वासने प्राङ्मुख उपविष्टो यजमान आचम्य पवित्रपाणिः प्राणानायम्य "करिष्यमाणोग्ररथशान्त्यङ्गतया मार्कण्डेयादिदेवताकलशस्थापनं पूजाराधनं च करिष्ये । तत्रादौ मण्डपदेवताराधनं च तत्तद्विधिना सह बल्यन्तं कर्म करिष्ये" इति संकल्पयेत् । ततः भूशुद्धिभूतशुद्धिपूर्वकं कलशार्चनं शंखार्चनम् आत्मार्चनं च कुर्यात् । यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।। इति सितसर्षपान् विकीर्य । **अपसर्पन्तु ते भूता०** ॥ **ॐ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद् भूतं वायसं देवतानाम् । असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवारुहेम ।। अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् । प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो अस्तु**[1] ।। इत्यादि प्रार्थ्य ।। **शुचीं वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः । ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः**[2] ।। **अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः**[3] ।। **उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतींष्यर्चयः**[4] ।। **एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना । शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ।। इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः । शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ।। इन्द्र शुद्धो हि**

---

१. ऋसं. (खिल) २.४.१-२ २. ऋसं. ७.५६.१२ ३. ऋसं. ८.४४.२१. ४. ऋसं. ८.४४.१७.

नो र॒यिं शु॒द्धो रत्ना॑नि दा॒शुषे॑। शु॒द्धो वृ॒त्राणि॑ जिघ्नसे शु॒द्धो वाजं॑ सिषाससि[१] ॥

इति मन्त्रैः पञ्चगव्यप्रोक्षणं कुर्यात् । एवं भूशुद्ध्यादि कृत्वा कलशार्चनादि कुर्यात् ।

कुण्डस्याग्रतो वेदिकायाम् उदक्संस्थं गणपतिकलशं नवग्रहहोमाङ्गत्वेनाऽऽदित्यादिनवग्रहकलशान् मृत्युंजय-त्र्यम्बककलशं चावाहयेत् । द्वादशलिङ्गतोभद्रं विलिख्य तत्र लिङ्गतोभद्रमण्डलदेवताः पूगीफलेषु आवाह्य मध्ये दार्वादिनिर्मितभद्रपीठोपरि व्रीह्यादिधान्यराशौ ताम्रादिनिर्मितं कलशं प्रतिष्ठाप्य पूर्णपात्रनिधानान्तं कृत्वा मध्ये मार्कण्डेयप्रतिमायां प्रधानदेवतां मार्कण्डेयं विधिनावाह्य पूजयेत् । तदुत्तरे अधिदेवतां मृत्युं तद्दक्षिणे प्रत्यधिदेवतां यमं च प्रतिमायामावाह्य पूजयेत् । मण्डलस्यैशानीतः प्रादक्षिण्येन अश्वत्थामादिसप्तचिरजीविनः प्रतिकलशमावाह्य पूजयेत् । तद्बाह्ये पूर्वादिक्रमेण कलशेषु कुमुदादिषोडशदेवता आवाह्य पूजयेत् । तद्बाह्ये पूर्वादिक्रमेण प्रतिदिशं क्रमेण संवत्सरादिकलशत्रयं संस्थाप्य संवत्सरदेवता ऋतुदेवता मासदेवताः पक्षदेवते तिथिदेवता वारदेवता नक्षत्रदेवता राशिदेवता दिक्पालदेवताः ऋतुषाड्गुण्यदेवताः षष्ठीदेवतां वर्धमानदेवतां च कलशेषु तत्तन्मन्त्रैः पृथक् पृथगावाह्य पूजयेत् । अथैतदावाहितदेवतानामग्रतः मातृकासन्निधाचष्टदलं विलिख्य तदुपरि धान्यराशौ कलशे प्रतिमायां न्यूनातिरिक्तदोषपरिहारकं श्रीमहाविष्णुमावाह्य पूजयेत् । इति देवतास्थापनस्थाननिर्देशः ॥

देवतावाहनात्पूर्वं दशसंस्कारैः ( ते चः—क्षालनं तन्तुवेष्टं च धूमामोदादिसंयुतम् । शोषदाहप्लवांश्चैव काठिन्यं चावगाहनम् ॥ उत्थानं शंखतोयं तु कलशं दशसंस्कृतम् । ) संस्कृते एकैकस्मिन्कलशे यथाविभवं समन्त्रकं च पञ्चगव्यं पञ्चामृतं दश मृदः सर्वौषधीः पञ्च त्वचः पञ्च पल्लवान् पञ्च रत्नादींश्च क्षिप्त्वा कर्पूरकेशरकस्तूरिगोरोचनादि प्रत्येकं क्षिप्त्वा नागवल्लीदलैः पुष्पहारादिभिश्चालङ्कृत्य, अग्न्युत्तारणपूर्वकं प्रतिमाः प्रतिष्ठाप्य पूजयेत् । तद्यथा :—

वेदिकापूजनम्—वेदिषद इति मन्त्रस्य उचथ्यपुत्रो दीर्घतमा ऋषिः, अग्निर्देवता जगती च्छन्दः । मही द्यौरिति मन्त्रस्य काण्वो मेधातिथिर्भूमिर्गायत्री । वेदिकाप्रार्थने विनियोगः ॥ ॐ वे॒दि॒षदे॑ प्रि॒यधा॑माय सु॒द्युते॑ धा॒सिमि॑व॒ प्र भ॑रा॒ योनि॑म॒ग्नये॑ ।

---

१. ऋसं. ८.९५.७-९.

**वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम्**[1] ॥ **ॐ मही द्यौः पृथिवी०**[2] ॥ ओषधय इत्यस्याथर्वणो भिषगोषधयोऽनुष्टुप् । धान्यराशिकरणे विनियोगः । **ॐ ओषधयः सं वदन्ते सोमेन सह राज्ञा । यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि**[3] ॥ इति धान्यराशिं कृत्वा । इदं ते पात्रमित्यस्य सोम ऋषिः इन्द्रो देवता त्रिष्टुप् छन्दः । आ कलशेष्वित्यस्य काश्यपो देवलः पवमानः सोमो गायत्री । कलशस्थापने विनियोगः । **ॐ इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो । पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः**[4] ॥ **ॐ आ कलशेषु धावति पवित्रे परिषिच्यते । उक्थैर्यज्ञेषु वर्धते**[5] ॥ इति कलशं निधाय । इमं मे गङ्गे इत्यस्य मन्त्रस्य सिन्धुक्षित् प्रैयमेधो नद्यो जगती । उदकपूरणे विनियोगः । **ॐ इमं मे गङ्गे०**[6] इत्यनेन पुण्यजलेन पूरयित्वा ॥ गायत्र्या विश्वामित्रः सविता गायत्री । गोमूत्रप्रक्षेपणे विनियोगः । **ॐ तत्सवितुर्वरेण्यं०**[7] इत्यनेन गोमूत्रं प्रक्षिप्य । गन्धद्वारामित्यस्य आनन्दकर्दमचिक्लीतेन्दिरासुताः श्रीरनुष्टुप् । गोमयप्रक्षेपणे विनियोगः । **ॐ गन्धद्वारां०** इत्यनेन गोमयं प्रक्षिप्य । आ प्यायस्वेत्यस्य राहूगणो गोतमः सोमो गायत्री । पयःक्षेपणे विनियोगः ॥ **ॐ आ प्यायस्व समेतु०**[8] इत्यनेन गोक्षीरम् ॥ दधिक्राव्ण इत्यस्य गोतमो वामदेवो दधिक्रावानुष्टुप् । दधिक्षेपणे विनियोगः । **ॐ दधिक्राव्णो अकारिषं०**[9] इत्यनेन दधि ॥ **शुक्रमसि ज्योतिरसि तेजोऽसि**[10] इति घृतम् ॥ पुनः आ प्यायस्व इत्यादिभिः त्रिभिः क्षीरदधिघृतानि प्रक्षिप्य । मधु वाता इति तिसृणां राहूगणो गोतमो विश्वे देवा गायत्री । मधुप्रक्षेपणे विनियोगः । **ॐ मधु वाता**

---

१. ऋसं. १.१४०.१. २. ऋसं. १.२२.१३. ३. ऋसं. १०.९७.२२. ४. ऋसं. १०.११२.६. ५. ऋसं. ९.१७.४. ६. ऋसं. १०.७५.५. ७. ऋसं. ३.६२.१०. ८. ऋसं. १.९१.१६. ९. ऋसं. ४.३९.६. १०. तैसं. १.१.१०.३.

**ऋतायते०**[1] । स्वादुः पवस्व भार्गवो वेनः पवमानः सोमो जगती । शर्कराप्रक्षेपणे विनियोगः । **ॐ स्वादुः पवस्व०**[2] ।। इति शर्करां प्रक्षिप्य ।। **अथ दशमृत्तिकाप्रक्षेपणम्** – हयगजवल्मीकह्रदगोष्ठराजद्वारचतुष्पथपर्वतनदीसंगमदेवालयेभ्यो दश मृदः । अश्वावतीरित्यस्य वसिष्ठ ऋषिः त्रिष्टुप् छन्दः उषो देवता । मृत्क्षेपणे विनियोगः । **ॐ अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः**[3] ।। हस्तेनैव इति मन्त्रस्य जुहूर्नाम ब्रह्मवादिन्यृषिः त्रिष्टुप् छन्दः विश्वे देवा देवता । मृत्क्षेपणे विनियोगः । **ॐ हस्तेनैव ग्राह्य आधिरस्या ब्रह्म जायेयमिति चेदवोचन् । न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य**[4] ।। अनु त्वा इत्यस्य कक्षीवान् ऋषिः त्रिष्टुप् छन्दः विश्वे देवा देवता । मृत्क्षेपणे विनियोगः ।। **ॐ अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् । त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुम्**[5] ।। हृदा तष्टेष्विति मन्त्रस्याऽऽङ्गिरसो बृहस्पतिर्ऋषिः त्रिष्टुप् छन्दः ज्ञानं देवता । मृत्क्षेपणे विनियोगः । **ॐ हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः । अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे**[6] ।। आ गावो इत्यस्य मन्त्रस्य भरद्वाज ऋषिः त्रिष्टुप् छन्दः गावो देवता । मृत्क्षेपणे विनियोगः ।। **ॐ आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे । प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः**[7] ।। राजा राष्ट्रानामित्यस्य वसिष्ठ ऋषिः द्विपदा विराट् छन्दः विश्वे देवा देवता । मृत्क्षेपणे विनियोगः । **ॐ राजा राष्ट्रानां पेशो नदीना-**

---

१. ऋसं. १.९०.६-८. २. ऋसं. ९.८५.६. ३. ऋसं. ७.४१.७. ४. ऋसं. १०.१०९.३. ५. ऋसं. १.१२१.११. ६. ऋसं. १०.७१.८. ७. ऋसं. ६.२८.१.

सोमो गायत्री । सर्वासां जपे विनियोगः । **ॐ आपो हि ष्ठा०**[1] ॥ **ॐ न हि ते क्षत्रं न सहो न मन्युं वयश्च नामी पतयन्त आपुः । नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ॥ अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः । नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥ उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ । अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्**[2] ॥ **ॐ स्वादिष्ठया०**[3] इति कुम्भमभिमन्त्रयेत् ॥ **पूर्णा दर्वि०** इति मन्त्रेण प्रतिकलशं पूर्णपात्रनिधानान्तं कृत्वा वरुणमावाह्य पञ्चोपचारैः संपूज्य तेषु क्रमशः श्रीगणपतिम् आदित्यादिनवग्रहान् त्र्यम्बकं चावाह्य मार्कण्डेयादिप्रधानदेवताधिदेवताप्रत्यधिदेवताश्चावाह्य पूजयेत् । तद्यथा मार्कण्डेयः— **मार्कण्डेय महाभाग सप्तकल्पान्तजीवन । आयुरारोग्यमैश्वर्यं देहि मे मुनिपुङ्गव ॥ ॐ भूः मार्कण्डेयमावाहयामि ॥ ॐ भुवः मार्कण्डेयमावाहयामि ॥ ॐ स्वः मार्कण्डेयमावाहयामि ॥ ॐ भूर्भुवः स्वः मार्कण्डेयमावाहयामि** ॥ अधिदेवता — परं मृत्यो इति मन्त्रस्य यमपुत्रः सङ्कुसुको त्रिष्टुप् छन्दः मृत्युर्देवता । मार्कण्डेयाधिदेवतामृत्युदेवतावाहने विनियोगः । **ॐ परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान्**[4] ॥ प्रत्यधिदेवता— यमाय सोममित्यस्य यमोऽनुष्टुप् यमो देवता । मार्कण्डेयप्रत्यधिदेवतायमावाहने विनियोगः । **ॐ यमाय सोमं सुनुत यमाय जुहुता हविः यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः**[5] ॥ चिरजीविनः— **अश्वत्थामा बलिर्व्यासो हनूमाँश्च बिभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः** ॥ अश्वत्थामा – दधिक्राव्ण इति मन्त्रस्य वामदेव ऋषिः अनुष्टुप् छन्दः दधिक्रा देवता । अश्वत्थामावाहने विनियोगः । **ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य**

---

१. ऋसं. १०.९.१-३. २. ऋसं. १.२४.६-८. ३. ऋसं. ९.१.१-३ ४. ऋसं. १०.१८.१. ५. ऋसं. १ .१४.१३.

# POONA ORIENTAL SERIES

[ Almost all works are fully annotated & transd. in English and those unpriced ones are almost in Press ] *JANUARY 1959*

| No. | Title | Rs. nP. |
|---|---|---|
| 1 | भगवद्गीता शांकरभाष्योपेता Best Critical Text. 2nd Ed. | 7·50 |
| 2 | —A Fresh Study—प्रो. वाडेकर | 2·50 |
| 3 | केन उपनिषद् सटीकमात्रं ed. by म. म. श्रीधरशास्त्री पाठक | 2·50 |
| 4 | कठ ———— | 5·— |
| 5 | मुण्डक ———— | 2·50 |
| 6 | ईशावास्य ———— | 2·50 |
| 7 | Constructive Survey of Upaniṣadic Philosophy by Prof. R. D. Ranade. Rough paper Ordinary ed. | 20·— |
| | —Glazed paper Libry. ed. | 25·— |
| 8 | श्रीशंकराचार्यविरचितप्रकरणग्रंथाः (70 Minor Works) 2nd ed. | 12·50 |
| 9 | सांख्यकारिका-डॉ. H. D. शर्मा | 10·— |
| 10 | —तत्त्वकौमुदी- ,, & G. झा. | 12·50 |
| 11 | —System, Critical Study-सोवनी | 2·50 |
| 12 | Ṛgveda-Lectures on-V. S. घाटे | |
| 13 | ब्रह्मसूत्र II-1-2—डॉ. बेलवलकर | |
| 14 | वेदान्तसार-प्रो. हिरिअण्णा | 5·— |
| 15 | तर्कसंग्रह-दीपिकामात्रं | 1·— |
| 16 | तर्कभाषा मूलमात्रं-कुलकर्णी | 1·25 |
| 17 | —English Tr. by G. झा. | 3·75 |
| 18 | अर्थसंग्रह—D. V. गोखले | 5·— |
| 19 | न्यायसार-अभ्यंकर & देवधर | 3·75 |
| 20 | सप्तपदार्थी-V. S. घाटे | |
| 21 | धम्मपद-डॉ. P. L. वैद्य | 3·75 |
| 22 | प्राकृतप्रकाश- ,, | |
| 23 | Manual of Pāli—C. V. जोशी | 3·75 |
| 24 | Comp.-Philology—प्रो. जागिरदार | |
| 25 | मुद्राराक्षस—K. H. ध्रुव | 7·50 |
| 26 | वेणीसंहार—K. N. द्रविड | 10·— |
| 27 | स्वप्नवासवदत्ता-प्रो. C. R. देवधर | 3·75 |
| 28 | प्रतिमा—प्रो. S. M. परांजपे | 10·— |
| 29 | Plays Ascribed to भास (Thesis) —C. R. देवधर | 1·25 |
| 30 | उत्तररामचरितं मूलमात्रं-डॉ. बेलवल्कर (Critical Text) | 2·50 |
| 31 | मेघदूत—K. B. पाठक | |
| 32 | पञ्चतन्त्रं मूलं—Dr. Edgerton | 2·50 |
| 33 | काव्यादर्श—S. K. बेलवलकर | |
| 34 | काव्यालंकारसूत्रवृत्ति Text | 3·75 |
| 35 | —Eng. Trans. by G. झा. | |
| 36 | Rāṣṭrakūṭas Their Times—डॉ. A. S. आळतेकर | 12·50 |
| 37 | 22 श्रुतिs of Ind. Music—तेलंग | 1·25 |
| 38 | Hindu Ethics—चंदावरकर | 2·50 |
| 39 | डॉ. G. झा. Commn. Vol. | 25·— |
| 40 | कृष्ण Problem—ताडपत्रीकर | |
| 41 | वैजयन्तिकोश—G. Oppert | |
| 42 | Democratic Hinduism | 5·— |
| 43 | अमरकोश क्षीरस्वामीटीकायुत with marginal English meanings, Indexes etc. डॉ. शर्मा & N. G. सरदेसाई | |
| 44 | शाश्वतकोशः—N. N. कुलकर्णी | 5·— |
| 45 | शब्दरूपावलिः | 0·50 |
| 46 | Systems of Sk. Grammar | |
| 47 | Sk. Inscriptions-डिस्कळकर | |
| 48 | बाणभट्टविरचिता कादम्बरी मूलमात्रं Text ed. by P. L. वैद्य accordg. to Peterson's pagination | 12·50 |
| | -कथामुखं only, with Notes, Tr. | 6·25 |
| 49 | काव्यप्रकाश X—डॉ. शर्मा. 2nd ed. | 7·50 |
| 50 | भामिनी विलास—H. D. शर्मा | |
| 51 | काव्यप्रकाश III उल्लास ,, | 1·25 |
| 52 | जातकसंग्रह—N. V. तुंगार | 1·25 |
| 53 | Ancient Karnataka (Tuluvās) by Dr. Saletore | 12·50 |
| 54 | भासनाटकचक्रं मूलमात्रं Texts of भास's 13 Plays—C. R. देवधर | 17·50 |
| 55 | पालि सद्दरूपावली | 0·25 |
| 56 | Picturesque Orientalia by Dr. R. N. Sardesai. Album of 103 Photos of Western Indologists | 11·25 |
| 57 | काव्यप्रकाश I & II—डॉ. शर्मा | 3·75 |

| No. | Title | Rs. nP. |
|---|---|---|
| 58 | न्यायसूत्र ( गौतम ) वात्स्यायन-भाष्य खद्योतटीका—डॉ. G. झा. | |
| 59 | —Full Eng. Trans. ,, | |
| 60 | कवींद्रचंद्रोदय—डॉ. शर्मा | 2·50 |
| 61 | प्रतिज्ञायौगंधरायण—C. R. देवधर | 3·75 |
| 62 | न्यायसूत्रपाठ | |
| 63 | गंगालहरी सार्थ ( मराठी ) | 2·50 |
| 64 | Brahmanical Asceticism ( संन्यास ) Thesis—डॉ. शर्मा | |
| 65 | चारुदत्त—C. R. देवधर | 3·75 |
| 66 | गंगालहरी समश्लोकी | 0·50 |
| 67 | गंगालहरी मूलमात्र | |
| 68 | महिम्नस्तोत्र सार्थ ( मराठी ) | 2·50 |
| 69 | अमरकोश with Eng. meaning | |
| 70 | ब्रह्मसूत्रचतुःसूत्रि—डॉ. शर्मा | 7·50 |
| 71 | चाणक्यनीतिसार-सार्थ ( मराठी ) | 0·50 |
| 72 | ऊरुभङ्गम्-C. R. देवधर | 1·25 |
| 73 | पालि धातुरूपावली-तुंगार | 1·25 |
| 74 | Ancient India S. I. History & Culture—Dr. S. K. अय्यंगार | 30·— |
| 75 | Festschrift ( Commn-Vol. ) Prof. P. V. काणे | 25·— |
| 76 | Hist. of Guptas—डॉ. R. N. दांडेकर | |
| 77 | अलंकाररत्नाकर—C. R. देवधर | 3·75 |
| 78 | छांदोग्योपनिषद् Eng. Tr. of Text & शांकरभाष्य by G. झा. | 7·50 |
| 79 | मराठी गाईड to Pālī Manual | 1·25 |
| 80 | गुजराति ——— | 1·25 |
| 81 | हिंदी ——— | 1·25 |
| 82 | इंग्लिश ——— | 1·25 |
| 83 | ऋजुलघ्वी मालतीमाधवकथा | 2·50 |
| 84 | मयूरसंदेश-डॉ. C. K. राजा | 3·75 |

| No. | Title | Rs. nP. |
|---|---|---|
| 85 | संबंधनिर्णय of गोपालन्याय-पञ्चानन—S. C. बानर्जि | 1·25 |
| 86 | बिल्हण's चौरपञ्चाशिका-ताडपत्रीकर | 2·50 |
| 87 | उवासगदसाओ—प्रो. N. A. गोरे | 7·50 |
| 88 | गान्धीगीता-( म. गांधीप्रणीत-राष्ट्रोद्धार-तत्वविवेचिनी ) S. N. ताडपत्रीकर | 3·75 |
| 89 | Epic & Brāhmaṇa Literature—*relation to*—V. V. दीक्षित | 7·50 |
| 90 | विश्वमोहनं नाटकम्—ताडपत्रीकर (*Sk. Drama on Goethe's Faust.*) | 3·75 |
| 91 | क्षेमेंद्र Studies *in-extenso* by डॉ. सूर्यकांत | 12·50 |
| 92 | ध्वन्यालोक Eng. Trans., Intro. —डॉ. कृष्णमूर्ति | 12·50 |
| 93 | Prof. P. K. Gode Commemn. Volume | |
| 94 | पञ्चरात्रम् — C. R. देवधर | 3·75 |
| 95 | मध्यमव्यायोगः— ,, | 2·50 |
| 96 | दूतवाक्यम् — ,, | 2·50 |
| 97 | दूतघटोत्कचम् — ,, | 2·50 |
| 98 | कर्णभारम् — ,, | 2·50 |
| 99 | उग्ररथ-शांतिः प्रयोगः ( *60th Year Celebrns Ritual.* ) | 5·— |
| 100 | अमरुशतकं सार्थ मराठी | 5·— |
| 101 | ,, सटीकं, Eng. Tr. etc. | 6·25 |

**Some Noteworthy Books**

| No. | Title | Rs. nP. |
|---|---|---|
| 1 | ऋग्वेदमन्त्रs in their ritual setting in the गृह्यसूत्रs by V. M. Apte | 2·50 |
| 2 | Non-Ṛgvedic Mantras rubricated in the आश्वलायनगृ.सू. Sources & Interpretn. by V. M. Apte | 3·— |

## *THE POONA ORIENTALIST*

( *A Journal devoted to Oriental Studies; started since 1936.*
*Annual Subscription : Rs. 10 in India, Sh. 20 or $ 5 outside India* )

Besides research articles, each issue contains
*a select Bibliography of latest Indological publications.*

**ORIENTAL BOOK AGENCY, 15 Shukrawar, POONA-2**

Modern Printing Press, Poona 2

# POONA ORIENTAL SERIES.

| Nos. | *Some Select Titles* | Rs.nP. |
|---|---|---|
| 1 | भगवद्गीता शांकरभाष्योपेता. Best Critical Text. 2nd ed. | 7 50 |
| 7 | Constructive Survey of Upanisadic Philosophy Glazed Paper Libry. ed.—R. D. Ranade. | 25·— |
| 8 | श्रीशंकराचार्यविरचितप्रकरणग्रंथाः ( 70 Minor Works ) | 12·50 |
| 36 | Rāshtrakutas & Their Times— A. S. Altekar | 12·50 |
| 38 | Hindu Ethics-Manual of— G. A. Chandavarkar | 2·50 |
| 39 | Dr. Ganganath Jha Commemoration Volume | 25·0 |
| 53 | Ancient Karnatak ( Tuluvas )— B. A. Saletore | 12·50 |
| 56 | Picturesque Orientalia— R. N. Sardesai ( *An Album of 103 Photos of Western Indologists* ) | 11·25 |
| 74 | Ancient India & S.I. History & Culture-Iyengar,2 Vols. | 30.— |
| 75 | Prof. Dr. P. V. Kane Commemoration Volume | 25·— |
| 88 | गांधी गीता ( म. गांधीप्रणीत-राष्ट्रोद्धारतत्त्वविवेचिनी )—ताडपत्रीकर | 3·75 |
| 90 | विश्वमोहनं नाटकं ( Sk. Drama on Goethe's Faust )- ,, | 3·75 |
| 91 | क्षेमेंद्र Studies *in extenso*— Dr. Suryakanta | 12·50 |
| 92 | ध्वन्यालोक English Trans., Notrs etc.—Dr. Krishnamurti | 12·50 |
| 93 | Prof. Dr. P. K. Gode Commemoration Volume | |
| 99 | उग्ररथ-शांति-प्रयोगः ( 60th Year Celebrations Ritual ) | 5.— |
| 100 | अमरुशतकं सार्थ मराठी, समश्लोकी, उपोद्घातासह—C. R. देवधर | 5.— |
| 101 | -do- with श्रृंगारदीपिकाव्याख्या, Eng. Notes, Tr. etc.-do- | 6·25 |

* * *

गीर्वाणज्ञानेश्वरी Being the Sanskrit rendering in verses of Sri Jnāneśvara's famous Comm. on Bhagavad Gītā. 2 Pts. 1-12 Chaps. 5·—